**अपगतचापल** (apagata-cāpala) *adj.* [*f.* –ā] **A** free from trickiness इदमिह कपिकुलमपगतचापलमुपनयति ... फलानि Kād. 45.15; **B** devoid of fickleness कंचित्कालमपगतचापला निश्चलैवावस्थिता ... दृष्टा च (मलयसुन्दरी) TilaMañ. 379.14.

**अपगतचूडामणि** (apagatacūḍāmaṇi) *adj.* from which crest jewel is removed (हर्षः) अपगतचूडामणिनि मलिनाकुलकुन्तले ... शिरसि शुचमारूढमूर्तिमतीमिव दधानम् ... ज्येष्ठं भ्रातरमपश्यत् HarṣaC. 243.4.

**अपगतजनलज्जम्** (apagatajanalajjam) *adv.* without shame from people, shamelessly स्पष्टवक्त्रारविन्दम्। अपगतजनलज्जं निश्चलाम्भोजनेत्रम् ... श्रीपति-ईश्यते स्म HariVi. 5.19.

**अपगतज्वर** (apagata-jvara) *adj.* free from fever, i.e. devoid of pain एकः सदेहो निर्मुक्तस्तिष्ठत्यपगतज्वरः YogVā.v.16.17.

**अपगतज्वरविकार** (apagata-jvaravikāra) *adj.* free from disease of fever राजपुत्रोऽपगत(ज्वर)विकारः (पूर्वप्रकृतिमापन्नः) PañcT. 2.80 (19) (259.1); Pañcā. 170.6.

**अपगततमःपटल** (apagata-tamaḥpaṭala) *adj.* from which the veil of ignorance is lost यदा तु तदेव चित्तसत्त्वम् ... अपगततमःपटलं सरजस्कं भवति TattvVai. 5.24 (*on* 1.2)

**अपगततमस्** (apagata-tamas) *adj.* from whom the quality of ignorance is removed or dispelled सनत्कुमारः। अपगततमसो महाप्रभावानशिषदमुष्य सभाजनाय शिष्यान् NīlaVi. 38.6.

**अपगततिमिरादिप्रतिबन्ध** (apagatatimirādi-pratibandha) *adj.* whose obstruction of the darkness etc. is removed अपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि SarvaDaSaṁ. 3.100.

**अपगतत्रपा** (apagata-trapā) *adj.* (*f.*) free from or devoid of bashfulness अपगतत्रपा कापि कामिनी तव मुखाम्बुजात् पूगचर्वितम्। प्रतिगृह्य तद् वक्त्रपङ्कजे निदधती गता पूर्णकामताम् Nārāy. x.68.4.

**अपगतत्रासता** (apagata-trāsatā) *f.* [Inst.] by way of being fearless किं च निष्कोपतया मुनीन्द्राणामपगतत्रासतया च सुराणां स्पर्धते मनोभिः (मणिः) UdaySuKa. 131.29.

**अपगतत्व** (apagata-tvà) *n.* **1** the state of being passed ततः कालस्यापगतत्वादुदितसंध्योपासनादिवन्न कश्चिदुपकारः स्यात् BālaKrī. ii.82.17 (*on* 3.212 (? 222)); **2** the state of being inapplicable अविभक्तेषु सुतेषु सत्सु विभक्तानां विभागतः पितृद्रव्यार्हत्वस्यापगतत्वेन मृते पितरि पुनः पितृद्रव्याग्रहणात् SmṛtiCan. iv.395.16.

**अपगतदुःख** (apagata-duḥkha) *adj.* free from grief वक्ष्यमाणैरपवदेयुरिति। अपगतदुःखान्कुर्युः BālamBha. iii.24.12 (*on* 3.7)

**अपगतदुःखभय** (apagata-duḥkhabhaya) *adj.* free from fear of grief (विप्रः) अपगतदुःखभयो ब्रह्मैव लोकस्तत्र पूजां लभते ManvaMu.233.30 (*on* 6.32)

**अपगतदुर्गप्रतिसंस्कारचित्त** (apagata-durgapratisaṁskāracitta) *adj.* having the thought of restoring the fort which has disappeared अथ पिङ्गलकः ... अपगतदुर्गप्रतिसंस्कारचित्तम् ... राजत्वमनुबभूव Pañcā. 4.30; Tantrākhyā. 4.17.

**अपगतदुर्दिन** (apagata-durdina) *adj.* from which cloudy days have passed चिरादनुकूलेन कालेनापगतदुर्दिनानि दिङ्मुखानि PratāYaBhū. 134.1.

**अपगतदोष** (apagata-doṣa) *adj.* whose defect is alleviated भोजनमपि चास्मै मत्स्यमांसरससुसंस्कृतं दापयेत्। तेनापगतदोषो भवति Hastyāyur.59.7 (1.9)

**अपगतद्वेषादिदोष** (apagata-dveṣādidoṣa) *adj.* free from or devoid of defects such as hatred (शिशुपालः) ब्रह्मभूतमपगतद्वेषादिदोषं भगवन्तमद्राक्षीत् ViṣṇuP. iv. 15.14.

**अपगतधनधी** (apagata-dhanadhī) *adj.* who has lost money and mental balance जीवे जन्मन्यपगतधनधी: BṛSaṁ. 104.25.

**अपगतधर्मविवाहादि** (apagata-dharmavivāhādi) *adj.* religious marriage etc. which are lost ताः क्षतयोनयो वैवाहिकमन्त्रैः संस्क्रियमाणा अपि यस्मादपगतधर्मविवाहादिशालिन्यो भवन्ति ManvaMu. 330.23 (*on* 8.226)

**अपगतधूम** (apagata-dhūma) *adj.* from which smoke has ceased ज्वालाशतरुद्धाम्बरमपगतधूमम् ... कः प्रविशति हुताशनम् Pañcā. 84.12.

**अपगतधृति** (apagata-dhṛti) *adj.* whose courage has disappeared किमिदमिति च ... अपगतधृतिः ... चकार चकोरेक्षणः क्षणं क्षोणीम् HarṣaC. 211.12; सुग्रीवस्तु ... अपगतधृतिः सुदूरमपासरत् RāmāCam. 4.13 (6)

**अपगतनय** (apagata-naya) *adj.* **A** from whom sense of conduct, i.e. sense of service has disappeared तस्मादपगतनयेन भृत्येन यदभिहितम्। स्वामिना तत् तथैव न प्रत्येतव्यम् Pañcā. 125.19; **B** from whom good conduct has disappeared सः ... प्रातिभट्यमाचरन्तम् ... अपगतनयम् आसन्नजातनयम् ... निरस्य ... आदवन्तीं नाम नगरीमवाप ĀnandRa. 6.15 (6)

**अपगतनवयावक** (apagata-navayāvaka) *adj.* from which the fresh lac has disappeared अपगतनवयावकैश्चिराय क्षितिगमनेन ... कथमपि चरणोत्पलैश्चलद्भिः ... अतमि तदा नितरां ... नितम्बिनीभिः ŚiśuVa. 7.67.

**अपगतनामरूपविशेषता** (apagata-nāmarūpaviśeṣatā) *f.* the distinction of name and form, which is lost सर्वमिदं ... अपगतनामरूपविशेषतया ... स्थूलसूक्ष्मसूक्ष्मदेवः मनुष्यादिव्यवहारशून्यं तमोमात्रं वर्तते ŚivārkaMaDī. i.340.2 (*on* i.2.9)

**अपगतनिजगुणत्व** (apagatanijaguṇa-tva) *n.* the state of having one's own qualities which are lost कर्कन्धूफलानामपगतनिजगुणत्वात् अतद्गुणत्वादतद्गुणाख्यं मीलितमिदम् Sarakaṇṭhā. iii.74.23.

**अपगतनिद्र** (apagata-nidra) *adj.* from whom sleep has vanished, i.e. who has wokenup तत्रापगतनिद्रश्च धाम्नि श्रीदर्शनो निजे। स्थितः ... व्यचिन्तयत् KathāSaSāg. xii.6.352; दिशि दिशि मृगयन्ते वल्लवा वत्समेते मुहुरपगतनिद्राः सप्तयो हेषितेन ŚārṅgaPa. 3720; Sabhāṣi. 2168.

**अपगतनियन्त्रण** (apagata-niyantraṇa) *adj.* from whom restrictions are removed, i.e. without restraint अपगतनियन्त्रणो यथासुखमनुभव राज्यसुखानि Kād. 77.21.

**अपगतनीविनिबन्धन** (apagata-nīvinibandhana) *adj.* having the knot of the garmant removed सरभसपरिरम्भणायोगादपगतनीविनिबन्धनं दुकूलम् ... सा करकमलेन रुरोध Nalābhyu. 6.34.

**अपगतपदपाटव** (apagata-padapāṭava) *adj.* from which the sharpness of word (order) has disappeared अपगतपदपाटवोऽपि गर्भादुपनिषदामधुनोद्गतः प्रबन्धः। जनयतु तव कौतुकम् AmṛUda. 4.26.

**अपगतपरलोकभय** (apagata-paralokabhaya) *adj.* in whom fear of next world has disappeared, free from fear of next world दुर्जनमिवापगतपरलोकभयम् ... राजकुलं विवेश Kād. 91.20.

**अपगतपरिस्पन्द** (apagata-parispanda) *adj.* from which movement has disappeared, free from movement अर्धकल्पिते चास्मिन्नकस्मादपगतपरिस्पन्दौ संदानिताविव केनाप्यकिंचित्करौ करौ संवृत्तौ TilaMañ. 55.22.

**अपगतपशुभाव** (apagata-paśubhāva) *adj.* whose state or condition of being an animal is removed शिथिलितपाशतयाऽपगतपशुभावः उपासकः शिव एव भवति ŚivārkaMaDi. ii.428.3 (*on* iv.1.3)

**अपगतपादम्रक्षण** (apagata-pādamrakṣaṇa) *adj.* (used as noun) (one) who has abandoned or given up anointing of feet अल्पेच्छत्वादपगतपादम्रक्षणः AbhisaAlmĀ. 457.18.

**अपगतपाप** (apagata-pāpa) *adj.* from which sin is removed, free from sin क्षत्रियरुधिरमये जगदपगतपापम् स्नपयसि पयसि शमितभवतापम् GītGo. i.1.6.

**अपगतपापश्वश्रुक** (apagata-pāpaśvaśruka) *adj.* from which wicked mother-in-law was removed सुखमपगतपापश्वश्रुकं कीर्तिसेनाप्यसमचरितलब्धख्यातिरासाद्य तत्र। (न्यवसत्) KathāSaSāg. vi.3.195

**अपगतपुराणपाण्डुरपत्र** (apagata-purāṇapāṇḍurapatra) *adj.* from which old yellow leaves have lost, i.e. fallen अपगतपुराणपाण्डुरपत्राः (?त्ताः) ... एतानि पुनवृक्षाणां विशेषणानि JñātāDhaT. 5A.3; 'निद्धूयजरढपंडुपत्ता' अपगतपुराणपाण्डुरपत्राः(?त्ताः) (वृक्षाः) AupaSūṬ. 13.4.

**अपगतपूर्वदेह** (apagata-pūrvadeha) *adj.* who has abandoned his earlier body वसिष्ठश्च ... निमिशापात् अपगतपूर्वदेहः ... मित्रावरुणाभ्यां संबभूव BrahmSūBh. (Śaṅ.) 668.8 (*on* iii.3.32)

**अपगतप्रतिबन्ध** (apagata-pratibandha) *adj.* whose restriction is removed, free from restriction तदिच्छावशादेवापगतप्रतिबन्धैरभिव्यक्तसामर्थ्यैर्विविधैः कर्मभिर्विविधानेकनरपश्वादिभेदभिन्नं भूतजातमारभ्यते NyāyRa. 657.11 (*on* 5.(15).6.6)

**अपगतप्रदेश** (apagata-pradeśa) *adj.* from which (restriction of) parts is removed, free from parts (समयः) अपगतप्रदेशो द्वितीयादिप्रदेशरहितो निरंश इत्यर्थः TātpaVṛ. 196.145 (*on* 2.47)